IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# अलंकारस्वरूपविचारे प्राच्य-पाश्चात्त्ययोः तुलनात्मकमध्ययनम्

**ड. सुरञ्जनसरकारः**
सहायक-अध्यापकः, संस्कृतविभागः
राममोहनकलेज्, कोलकाता-९

**Abstract:**
अलंकारशब्दस्य द्विविधा व्युत्पत्तिरस्ति- अलंक्रियतेऽनेन, अलंकृतिरलंकारः चेति। करणव्युत्पन्नः अलंकारशब्दः उपमादीनां बोधकः, भावव्युत्पन्नः अलंकारशब्दः दोषाभावगुणरीत्यलंकारादिसकलकाव्यसौन्दर्यपरः। वस्तुतः यथा वनिताया आननं स्वतः सुन्दरमपि निर्भूषं चेन्न भाति, तथैव काव्यमप्यलंकारं विना नैव शोभते। किञ्च कटककुण्डलादयो यथा मानवशरीरमाश्रित्य तिष्ठन्तः शरीरशोभां वर्धयन्ति तथैव काव्येऽपि उपमारूपकादयोऽलंकाराः शब्दार्थशरीरमाश्रित्य तदीयशोभाञ्च वर्धयन्ति। पाश्चात्यकाव्यशास्त्रेऽपि प्रतिपादितम्- अलंकारं विना काव्यं विम्लानं भवेत्, यथा सूर्यं विना दिवसश्रीरिवेति। वस्तुतः प्राच्यवत् पाश्चात्त्येऽपि काव्येऽलंकारस्य प्राधान्यं प्रतिपादितम्। केन मार्गेण तत्कृतं तत्तु मया गवेषणापत्रे स्वयुक्त्या प्रतिपादितम्। किञ्च नूतनं तथ्यमपि प्रदत्तम्।

**Keywords:** अलंकारः, भामहः, दण्डी, विश्वनाथः, वामनः, Aristotle, Longinus, Coleridge.

काव्यसंसारे कविः सततं प्रकृतिमनुसरति। काव्ये समाजस्य प्रकृतेश्च प्रतिविम्बनं भवति। अतः कविः स्वकाव्यमलंकरोति उपमादिभिरलंकारैः। वस्तुतः कवेरनलंकृता वाणी विधवेव निर्भूषा। यद्भवतु अलंकारशब्दस्य कोऽर्थः? तदुच्यते अलमुपपदात् कृधातोः घञ्प्रत्ययेन अलंकारशब्दो निष्पद्यते। यस्यार्थो भवति अलं करोति, अलंक्रियतेऽनेन वा।

अत्र तु करणव्युत्पन्नः अलंकारशब्दः उपमादीनां बोधकः। अलंकृतिरलंकार इति भावव्युत्पन्नः अलंकारशब्दः दोषाभावगुणरीत्यलंकारादिसकलकाव्यसौन्दर्यपरः। तदुक्तं वामनेन – 'सौन्दर्यमलंकारः'[1] इति। अत्रेदमुल्लेख्यं यत् अलंकारशास्त्रे सर्वादौ भामहेन अलंकारस्य लक्षणं कृतम्- 'वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृतिः'[2] इति। अर्थाद् वक्रपूर्णोक्तिरेव शब्दार्थयोरलंकार इत्युच्यते। अत्र वक्रता खलु काव्यसौन्दर्यम्। अतः काव्यस्य अलंकरणं सौन्दर्यसाधनं वालंकारः। तेनैव काव्यस्य तत्त्वापत्तिः। भामहमतानुसारं यथा वनिताया आननं स्वतः सुन्दरमपि निर्भूषं चेन्न भाति, तथैव काव्यमप्यलंकारं विना नैव शोभते। तदुक्तं- 'न कान्तमपि निर्भूषं विभाति वनितानन्म्'[3] इति। अथ भामहसम्मतालंकारमार्गं पोषयन्नाचार्यो दण्डी अपि अलंकारं काव्यस्य

अनिवार्यतत्त्वरूपेण स्वरूपाधायकतत्त्वरूपेण वा स्वीकरोति- 'काव्यशोभाकरान् धर्मान्नलंकरान् प्रचक्षते'।[4] वस्तुतः अलंकारा एव काव्यस्य वास्तविकसौन्दर्यकारणभूताः। परन्तु वामनः गुणान् काव्यस्य जीवनाधायकतत्त्वरूपेण मुख्यशोभाधायकधर्मरूपेण च स्वीकरोति- 'काव्यशोभायाः कर्तारो धर्मा गुणाः। तदतिशयहेतवस्त्वलंकाराः।'[5] इति।

अत्रेदमवधेयं यत् वामनः गुणान् काव्यस्वरूपाधायकतत्त्वरूपेण, तथा अलंकारञ्च उत्कर्षाधायकतत्त्वरूपेण स्वीकुर्वन् गुणालंकारयोर्भेदं प्रतिपादयति। अत एव तन्मते गुणरहितं काव्यम् अलंकारमात्रसद्भावेन न सहृदयैः काव्यत्वेन गृह्यते। वस्तुतः काव्यस्य वास्तविकसौन्दर्यं तावद् गुणा एव, कामिन्या यौवनमिव। उदाहरणं हि-

युवतेरिव रूपमङ्गं काव्यं स्वदते शुद्धगुणं तदप्यतीव।
विहितप्रणयं निरन्तराभिः सदलंकारविकल्पकल्पनाभिः॥
यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनबन्ध्यमङ्गनायाः।
अपि जनदयितानि दुर्भगत्वं नियतमलंकरणानि संश्रयन्ते॥[6] इति।

वक्रोक्तिजीवितमिति ग्रन्थे आचार्यकुन्तकः अलंकारान् काव्यस्वरूपाधायकतत्त्वरूपेण स्वीकरोति-

'अलंकृतिरलंकार्यमपोद्धृत्य विवेच्यते।
तदुपायतया, तत्त्वं सालंकारस्य काव्यता॥'[7] इति।

आचार्यैः आनन्दवर्धनैः अलंकारा अङ्गाश्रिताः इति मतं पोषितम्-

'अङ्गाश्रितास्त्वलंकारा मन्तव्या कटकादिवत्'।[8]

अर्थात् यथा कटककुण्डलादयो मानवशरीरमाश्रित्य तिष्ठन्तः शरीरशोभां वर्धयन्ति तथा काव्येऽपि उपमारूपकादयोऽलंकाराः शब्दार्थशरीरमाश्रित्य तदीयशोभाञ्च वर्धयन्ति। अपरञ्चासौ तेषामेव अलंकाराणामलंकारत्वं स्वीकरोति ये रसभावादितात्पर्यमाश्रित्य विनिविष्टाः सन्ति। अलंकाराणाञ्च विवक्षा रसभावादिपरत्वेनैव कर्तव्या तथा च तेषां कथमप्यङ्गित्वेन निर्वहणं कर्तव्यम्-

रसभावादितात्पर्यमाश्रित्य विनिवेशनम्।
अलंकृतीनां सर्वासामलंकारत्वसाधनम्॥[9]
विवक्षा तत्परत्वेन नाङ्गित्वेन कथञ्चन।
काले च ग्रहणत्यागौ नातिनिर्वहणैषिता॥[10]
निर्व्यूढावपि चाङ्गये यत्नेन प्रत्यवेक्षणम्।
रूपकादेरलंकारवर्गस्याङ्गत्वसाधनम्॥[11]

काव्यप्रकाशकारैः मम्मटाचार्यैस्तु अलंकारो हि काव्यस्य अनित्यधर्म इति मतमुपन्यस्तम्-

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलंकारास्तेऽनुप्रासोपमादयः॥[12] इति।

वस्तुतः मम्मटनये यदलंकारास्तदैव शोभन्ते यदा ते रसमुपकुर्वन्ति, रसाभावे च केवलानामलंकाराणां सद्भावे, उक्तिवैचित्र्यरूपा भवन्ति न तु वास्तवेन अलंकाराः। आचार्यक्षेमेन्द्रेणापि भणितं बाह्यशोभाकारिधर्मत्वेन अलंकारा ग्राह्याः- 'अलंकाराः अनुप्रासोपमादयः अलंकारा एव बाह्यशोभाकराणि भूषणान्येव, एतेषामलंकार्यत्वाभाव इति बोध्यम्'[13] इति। विश्वनाथकविराजेनापि अलंकारस्य प्राधान्यं स्वीकृतम्। तन्नये अलंकाराः शब्दार्थयोरस्थिरधर्मत्वेन शब्दार्थशोभाजनकतासाहचर्येण काव्यात्मभूतरसस्यापि उपकारकाः-

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।

रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिदवत्॥[14]

पाश्चात्यमतम्-

प्राच्यालंकारिकैः यथा काव्यशास्त्रे अलंकारस्वरूपविषये अधिकतया चर्चा विहिता तथा पाश्चात्यालंकारिकानां ग्रन्थेषु अपि दरीदृश्यते। Aristotle महोदयेन काव्यस्य अत्यावश्यकतत्त्वरूपेण रूपकालंकारः स्वीकृतः। वस्तुतः कविप्रतिभावलेनैव काव्ये रूपकमाधातुं शक्यते, न तु प्रयत्नद्वारेति- 'For it is this alone which cannot be acquired, and which consisting in a quick discernment of resemblances is a certain mark of genius.'[15] अत्रेदमवधेयं यत् Aristotle महोदयस्य मतमिदं प्राच्यालंकारिक-आनन्दवर्धनस्य मतेन सह साम्यमावहति।

Longinus महोदयेन कथितं काव्ये अलंकाराणां समीक्षापूर्वकं प्रयोगः करणीयः, यतो हि अलंकाराणां भव्यता समुचिते स्थाने, समुचिते काले, समुचितोपायेन च विनिवेशेन भवतीति- 'The figures of thought and diction have to be judiciously employed. The grandeur of any figure will depend on its being employed in the right place and right manner, on the right occasion, and with the right motive.'[16]

Coleridge महोदयमते प्रकृष्टरसयोजनया अलंकाराः स्वत एव आपतन्ति। यतो हि अलंकारा मूलतो रसादेव उत्पन्नाः। तदुक्तं- 'Strong passions command figurative language that figures of speech are originally the off-spring of passions'.[17]

Demetrius महोदयेनोक्तं काव्ये अलंकारैरेव सौन्दर्यं महत्त्वञ्चाधीयते, अपरञ्च यत्साधारणवक्येषु वक्तुं न शक्यते तद्रूपकेण अधिकस्पष्टतया उत्तमतया च प्रकाशयितुं शक्यते। अपि च, Herbert महोदयेन काव्येऽलंकाराणां नियतस्थितिः प्रतिपादिता। रूपकालंकारः काव्यस्य विविधानि अङ्गानि परस्परं संयोजयति, अनभिव्यक्तं भावं न तर्केण, नापि सामान्यकथनमात्रेण, अपि तु सम्यग्भावप्रवणतया व्यञ्जयति- 'It (metaphor) is the synthesis of several units of observation in to one commanding image, it is the expression of complex idea, not by analysis, nor by abstract statement, but by a sudden perception of an objective relation.'[18]

मूल्यायनम्-

परिशेषे वक्तुं शक्यते यत् यथा प्राच्यालंकारिकैः भामहदण्डीविश्वनाथादिभिः काव्यस्य स्वरूपाधायकतत्त्वरूपेण अलंकारः स्वीकृतः तथैव पाश्चात्यकाव्यतात्त्विकैः Demetrius, Herbert इत्यादिभिः तदीये काव्यशास्त्रे अलंकाराणाम् आन्तरिकतत्त्वरूपेण काव्ये प्रतिपादनं कृतम्। अपि च, पाश्चात्यकाव्यशास्त्रे एवं प्रतिपादितम्- अलंकारं विना काव्यं विम्लानं भवेत्, यथा सूर्यं विना दिवसश्रीरिवेति- 'For myself I will own at once that a style without metaphor and simile is to me like a day without sun or a woodland without birds.'

किञ्च प्राच्य-आलंकारिकाः आनन्दवर्धन-मम्मट-विश्वनाथादयः काव्ये अलंकाराणाम् अनियतस्थितिं वाह्यधर्मत्वं प्रतिपादयन्ति-

विवक्षा तत्परत्वेन नाङ्गित्वेन कथञ्चन।

काले च ग्रहणत्यागौ नातिनिर्वहणैषिता॥

निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्।

रूपकादेरलंकारवर्गस्याङ्गत्वसाधनम्॥

एवम् Aristotle, Longinus, Coleridge इत्यादिभिः पाश्चात्यकाव्यतात्त्विकैः विषयितम् अलंकाराणां रसोपकारकत्वेन समीक्षापूर्वकमेव रसभावप्रवणतयैव प्रयोगः करणीयः।

वस्तुतस्तु अलंकाराणां कार्यं भवति अन्यस्य शोभावर्धनमिति, यथा कटककुण्डलादयः अलंकाराः मानवशरीरस्य शोभां वर्धयन्तः आत्मानमप्युपकुर्वन्ति, तथैव काव्येऽपि अलंकाराः शब्दार्थशरीरं रमनीयं कुर्वन्तीति शम्।


**References:**

1. काव्यालंकारसूत्रवृत्तिः, 1/2
2. *काव्यालंकारः,* 1/36
3. *Ibid,* 1/13
4. □□□□□□□□□□□□, 2/1
5. काव्यालंकारसूत्रवृत्तिः- 3/1/1, 2
6. *Ibid,* 3/1
7. वक्रोक्तिजीवितम्, 1/6
8. ध्वन्यालोकः, 2/21
9. *Ibid,* 2/28
10. *Ibid,* 2/41
11. *Ibid,* 2/42
12. काव्यप्रकाशः, 8/67
13. औचित्यविचारचर्चा, पञ्चमकारिकाया वृत्तौ, पृ. ४
14. साहित्यदर्पणः, 10/1
15. *Comparative Aesthetics: East and west,* Prof. Angaraj Chaudhury, Eastern Book Linkers, Delhi-110007. Section-III, p. 204
16. *The History of Literary Criticism (H.L.C),* P.S.Shastry & Laxmi Narayan Agrawal, Educational Publishers, Agra-3, 1969, p. 75
17. *Ibid,* p. 314
18. *Ibid,* p. 203

**Bibliography:**

Banahatti, Narayan. *The Kavyaprakasha of Mammatacharya with the Jhalkikara & Balabodhini commentaries*. Delhi: Parimal Publications, 2008(Reprint).

Bhattacharya, Bishnupada. *Kavyamimamsa*. Kolkata: Jijnasa Publications Ltd., 1982.

Chaudhury, Angaraj. *Comparative Aesthetics: East and west*. Delhi: Eastern Book Linkers. 1991.

Dasgupta, Surendranath. *Kavyavicara*. Kolkata: Mitra & Ghosh, 1939.

Jha, VrajaMohan. *Auchitya Vichar Charcha Of Kshemendra With Prabha Vyakhya*. Varanasi: Chaukhamba Vidyabhavan, 1982(Third Edition).

Mahanty, Dr. Sugyan Kumar. *Kavyatattvalokah*. Teerupati: rashtriya Sanskrit Vidyapeetha, 2010.

Mishra, Jayamanta. *Kavyavicchittimimamsa*. Delhi: Rashtriya Sanskrit Sansthan, 1998.

Pandey, Kanti Chandra. *Comparative Aesthetics(Western Aesthetics)*. Varanasi: Choukhamba Sanskrit Series Office, 1972(First Edition).

-, -. *Comparative Aesthetics(Indian Aesthetics)*. Varanasi: Chaukhamba Sanskrit Series Office, 1995(First Edition).

Sastri, Mahadeva. *The Dhvanyaloka of Sri Anandavardhanacharya with the Lochana & Balapriaya commentaries*. Varanasi: Chaukhamba Sanskrit Sansthan, 2009.

Sastri, Sankara Ram. *Kavyalankara of Bhamaha*. Madras: Sri Balamanorama Press, 1956.

Shastry, P.S. & Agrawal, Laxmi Narayan. *The History of Literary Criticism (H.L.C).* Agra: Educational Publishers, 1969(First Edition).

Siddhantashiromani, Vishveshvara. *Srivamanacaryaviracita Kavyalankara Sutra Vritti(Kavyalankaradipika hindivyakhyavibhusita)*. Delhi: Hindi Madhyam Karyanvaya Nideshalaya, Delhi University, 1994.

Singh, Satyavrat. *Sahityadarpana of Viswanatha*. Varansi: Chowkhamba Vidya Bhawan, 1957.